ह – ग्रामस्तव ह स्वम्, ग्रामो मम ह स्वम्, युवयोर्ह स्वम्, आवयोर्ह स्वम्, युष्माकं ह स्वम्, अस्माकं ह स्वम् । ग्रामस्तुभ्यं ह दीयते, ग्रामो मह्यं ह दीयते, युवाभ्यां ह दीयते, आवाभ्यां ह दीयते, युष्मभ्यां ह दीयते, अस्मभ्यं ह दीयते । ग्रामस्त्वां ह पश्यति, ग्रामो मां ह पश्यति, युवां ह पश्यति, आवां ह पश्यति, युष्मान् ह पश्यति, अस्मान् ह पश्यति ।

अह – ग्रामस्तवाह स्वम्, ग्रामो ममाह स्वम्, युवयोरह स्वम्, आवयोरह स्वम्, युष्माकमह स्वम्, अस्माकमह स्वम् । ग्रामस्तुभ्यमह दीयते, ग्रामो मह्यमह दीयते, युवाभ्यामह दीयते, आवाभ्यामह दीयते, युष्मभ्यमह दीयते, अस्मभ्यमह दीयते । ग्रामस्त्वामह पश्यति, ग्रामो मामह पश्यति, युवामह पश्यति, आवामह पश्यति, युष्मानह पश्यति, अस्मानह पश्यति ।

एव – ग्रामस्तवैव स्वम्, ग्रामो ममैव स्वम्, युवयोरेव स्वम्, आवयोरेव स्मम्, युष्माकमेव स्वम् अस्माकमेव स्वम् । ग्रामस्तुभ्यमेव दीयते, ग्रामो मह्यमेव दीयते, युवाभ्यामेव दीयते, आवाभ्यामेव दीयते, युष्मभ्यमेव दीयते, अस्मभ्यमेव दीयते । ग्रामस्त्वामेव पश्यति, ग्रामो मामेव पश्यति, युवामेव पश्यति, आवामेव पश्यति, युष्मानेव पश्यति, अस्मानेव पश्यति ।

युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम् । युक्तयुक्ते [1]प्रतिषेधो न भवति । ग्रामश्च ते स्वम्, नगरं च मे स्वम् ॥

## पश्यार्थैश्चानालोचने । (२७/४०९)

पश्यार्थाः दर्शनार्थाः । [2]दर्शनं ज्ञानम्, आलोचनम्, चक्षुर्विज्ञानम् । तैः पश्यार्थैरनालोचने [3]वर्तमानैर्युक्ते युष्मदस्मदोः वान्नावादयो न भवन्ति । ग्रामस्तव स्वं [4]समीक्ष्यागतः । ग्रामो मम स्वं समीक्ष्यागतः । ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः । ग्रामो मह्यं दीयमानं समीक्ष्यागतः । ग्रामस्त्वां समीक्ष्यागतः । ग्रामो मां समीक्ष्यागतः । अनालोचने इति किम् ? ग्रामस्त्वा [5]पश्यति । ग्रामो मा पश्यति । पश्यार्थैर्युक्तयुक्ते[6]ऽपि च [7]प्रतिषेध इष्यते । तथा चैवोदाहृतम् ॥

## सपूर्वायाः प्रथमाया विभाषा । (२८/४१०)

विद्यमानपूर्वात् प्रथमान्तात् पदात् उत्तरयोः युष्मदस्मदोः विभाषा वान्नावादयो [8]न भवन्ति । ग्रामे कम्बलस्ते स्वम्, ग्रामे कम्बलस्तव स्वम् । ग्रामे कम्बलो मे स्वम्, ग्रामे कम्बलो मम स्वम् । ग्रामे कम्बलस्ते दीयते, ग्रामे कम्बलस्तुभ्यं दीयते । ग्रामे कम्बलो मे दीयते, ग्रामे कम्बलो मह्यं दीयते । [9]ग्रामे छात्रास्त्वा पश्यन्ति, ग्रामे छात्रास्त्वां पश्यन्ति । ग्रामे छात्रा मा पश्यन्ति, ग्रामे छात्रा मां पश्यन्ति । सपूर्वायाः इति किम् ? कम्बलस्ते स्वम् । कम्बलो मे स्वम् । प्रथमायाः इति किम् ? कम्बलो ग्रामे ते स्वम् । कम्बलो ग्रामे मे स्वम् ।

---

1. तु इत्यधिकम् ब. क. ड. इ, विप्रतिषेधो ह. 2. वाक्यमिदं नास्ति ह. 3. वर्तमानैः नास्ति इ. 4. संदृश्य इ. 5. आलोचयति क. 6. अपि नास्ति ब.क. 7. विप्रतिषेधः ह. 8. न नास्ति क. 9. ग्रामे छात्रः त्वां पश्यति ब.